दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-97 | 1 | जनवरी 28, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् माघशुक्लदशमी
माघ 15 प्रविष्टांशः मङ्गलमयः भवेत्

2 नवदेहल्यां संसदभवनपरिसरे संसदः आयव्यय-सत्रात् पूर्व रक्षामन्त्रिणः राजनाथसिंहस्य अध्यक्षतायां सर्वदलीय-सभा

3 Pride Moment- परमवीरचक्रविजेता सूबेदारः सञ्जयकुमारः सेनायां 'कैप्टन' (Captain) पदेन सुशोभितः

6 गणतन्त्रभारतसमीक्षा -डॉ विमलेश झा

## भारतं यूरोपीयसङ्घ च ऐतिहासिकं मुक्तव्यापारसमन्वयं निश्चितं कृतवन्तौ



**हिमसंस्कृतवार्ताः** - भारतं यूरोपीयसंघः च ऐतिहासिकं मुक्तव्यापारसमन्वयं निश्चितं कृतवन्तौ। नवदिल्ल्यां प्रधानमन्त्री नरेन्द्रमोदी, यूरोपीयपरिषदः अध्यक्षः एन्टोनियो कोस्टा इत्येषः यूरोपीय-आयोगस्य अध्यक्षा उर्सुला फॉन डेर लायन इत्येषा प्रतिनिधिस्तरीय वार्तायाः अनन्तरं सन्धिपत्रेषु हस्ताक्षराणि कृतवन्तः। भारत-यूरोपीय-सङ्घयोःमध्ये व्यापार- सुरक्षा-रक्षा-सहभागिता, गतिशीलता-आपत्-संकट-प्रबंधन, हरित-हाइड्रोजन् इत्येतेषां च क्षेत्राणां सप्तसन्धिपत्राणां आदानप्रदानम् अभवत्। प्रधानमन्त्रिणा श्रीमोदिना, यूरोपीय-आयोगस्य अध्यक्षया उर्सुला फॉन डेर लायन इत्यनया च सर्व-व्यवहाराणां जननी इति उक्त्वा सन्धिं प्रशंसितवन्तौ। अस्मिन् अवसरे प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत्, भारत-यूरोपीयसङ्घयोः सम्बन्धः सुदृढः अभवत्, तेषां सम्बन्धः नूतनम् औन्नत्यं प्राप्नोत्। सः अवदत् यत्, एषा न केवलं व्यापार-सन्धिः, अपितु सहभागी-समृद्धेः नूतनः प्रारूपः अस्ति। प्रधानमन्त्री अवदत् यत्, भारतं सप्तविंशति-राष्ट्राणां यूरोपीयसङ्केन सह बृहत्तमं मुक्तव्यापार-सन्धिं कृतवान् इति। सः अवदत् यत् एतेन निवेशानां वृद्धिः भविष्यति, वैश्विकस्तरे आपूर्तिशृङ्खलाः सुदृढाः भविष्यन्ति ।

### भारत-यूरोपीय-सङ्घयोः मध्ये व्यापार सुरक्षा-रक्षा-सहभागिता, गतिशीलता-आपत्-संकट-प्रबंधन, हरित-हाइड्रोजन् इत्येतेषां च क्षेत्राणां सप्तसन्धिपत्राणां आदानप्रदानम् अभवत्

एफ़. टि. ए. इत्यस्य समापनानन्तरं यूरोपीयपरिषदः अध्यक्षः एन्टोनियो कोस्टा, एफ़. टि. ए. इत्यस्य हस्ताक्षरं ऐतिहासिकं क्षणम् इत्यवोचत्। सः अवदत् यत् यूरोपीयसङ्घः, भारतं च नूतनं अध्यायं प्रारब्धवन्तौ। सः अवदत् यत्, यूरोपीयसङ्घः, भारतं च संयुक्त-समृद्धेः सुरक्षायाः च कृते मिलित्वा कार्यं करिष्यतः। अस्मिन् अवसरे सम्बोधयन्ती उर्सुला फॉन डेर लायन इत्येषा प्रधानमन्त्रिणं नरेन्द्रमोदिनं असाधारण-आतिथ्याय धन्यवादं प्रदत्तवती । सा अवोचत् यत्, गणतन्त्रदिवसस्य पथ सञ्चलने मुख्यातिथिः रूपेण भागग्रहणं सम्मानप्रदः अस्ति। सा अवोचत् यत्, भारतम् अग्रे सरति एतत् दृष्ट्वा यूरोपवर्तिभागः प्रसन्नः अस्ति। सा अवोचत्, यदा भारतं सफलं भवति तदा संसारः अधिकस्थिरः, समृद्धः, सुरक्षितः च भवति।

## सुभाषितम्

**हीनांगानतिरिक्तांगान्,**
**विद्याहीनान् विगर्हितान्।**
**रूपद्रविणहीनांश्च,**
**सत्वहीनांश्च नाक्षिपेत्।।**
**(महाभारत, अनुशासनपर्व- १०४/३५)**

भावार्थः- हीन अंग वाले, अधिक अंग वाले, विद्याहीन, निन्दित, रूपहीन, धनहीन तथा बलहीन मनुष्यों पर आक्षेप नहीं करना चाहिए।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## प्रधानमन्त्रिणा नरेन्द्रमोदिना दक्षिणवर्तिनि गोवाराज्ये आयोजितस्य षड्विंशत्यधिक द्विसहस्रतम वर्षस्य भारत-ऊर्जा-सप्ताहस्य उद्घाटनं विहितम्



**हिमसंस्कृतवार्ताः** - प्रधानमन्त्रिणा नरेन्द्रमोदिना दक्षिणवर्तिनि गोवाराज्ये आयोजितस्य षड्विंशत्यधिक द्विसहस्रतम वर्षस्य भारत-ऊर्जा-सप्ताहस्य उद्घाटनं विहितम्। अस्मिन् अवसरे सः अवदत् यत्, भारतं ऊर्जाक्षेत्रस्य अवसराणाम् भूमिः अस्ति तथा च वैश्विकरूपेण पेट्रोलियम इत्यस्य इन्धनस्य उत्पादानां शीर्षपञ्चसु निर्यातकेषु अन्यतमम् अस्ति। सः अवदत् यत्, भारत-ऊर्जा-सप्ताहः ऊर्जाक्षेत्रे संवादस्य क्रियायाः च वैश्विक मञ्चरूपेण द्रुतगत्या उद्भूतः अस्ति। प्रधानमंत्रीः अवदत् यत् भारतं सम्प्रति शोधनक्षमतायाः दृष्ट्या विश्वे द्वितीयं स्थानं धारयति तथा च शीघ्रमेव विश्वे प्रथमस्थाने भविष्यति । रक्षामन्त्री राजनाथसिंहः यूरोपीयसङ्केन सह देशस्य वर्धमानसहभागित्वं पुनः दृढीकृतवान्। रक्षामन्त्री नवदेहली-नगरे यूरोपीयसङ्घस्य प्रतिनिधिसङ्घेन सह मेलनं कृतवान्। रक्षामन्त्री वैश्विकशान्तेः सुरक्षायाः च विषये देशस्य प्रतिबद्धतायाः विषये अपि अवधानं दत्तवान्। यूरोपीय-आयोगस्य उपाध्यक्षा काजा कल्लास् इत्येषा सुरक्षायाः रक्षायाः च सहभागित्वेषु हस्ताक्षरं महत्त्वपूर्णम् इति अमन्यत, येन उभयोः पक्षयोः मध्ये रक्षा-सहकारः सुदृढः भविष्यति इति सा उक्तवती।

## भारतेन संयुक्तराष्ट्रसंघे उक्तं यत् भारतस्य आन्तरिक-जम्मू-कश्मीरस्य विषये टिप्पणीं कर्तुं इस्लामाबादस्य अधिकारो नास्ति




**हिमसंस्कृतवार्ताः** - भारतेन संयुक्तराष्ट्रसङ्घ पाकिस्तानं प्रति वाक्प्रहारः कृतः यतः पाकिस्तानदेशः सिंदूराभियानप्रकरणे मिथ्या-भ्रामकम् कथनं प्रसारयति। भारतस्य आन्तरिकविषयेषु, विशेषतः केन्द्रशासितप्रदेशस्य जम्मू-कश्मीरस्य विषये टिप्पणीं कर्तुं इस्लामाबादस्य अधिकारो नास्ति इति सः दृढीकृतवान्। संयुक्तराष्ट्रसङ्घस्य सुरक्षापरिषदि दृढप्रत्युत्तरे, संयुक्तराष्ट्रसङ्घे भारतस्य स्थायीप्रतिनिधिः पी. हरीशः दृढतया उक्तवान् यत्, पाकिस्तानस्य राज्यनीतेः साधनरूपेण भयोत्पादनस्य निरन्तरप्रयोगं असहनीयम् अस्ति। श्रीहरीशः पाकिस्तानस्य राजदूतस्य असीम इफ्तिखार अहमद इत्यस्य सुरक्षापरिषदि अन्ताराष्ट्रियविधिप्रशासनस्य पुनः दृढीकरणं-शान्तेः, न्यायस्य, बहुपक्षवादस्य च पुनरुद्धरणस्य मार्गे मुक्त-वादविवादस्य समये कृतानि वक्तव्यानि प्रत्युत्तरन् आसीत्। अस्मिन् अवसरे संयुक्तराष्ट्रसङ्घस्य महासचिवः एन्टोनियो गुटरेसः उक्तवान् यत् विश्वस्य अनेकेषु भागेषु विधिप्रशासनस्य स्थाने जङ्गलराजः प्रचलति।

## युनाइटेड डेमोक्रेटिक-फ़्रण्ट इत्यस्य द्वौ विधायकौ केरल-विधानसभायाः पुरतः विरोध-प्रदर्शनं कृतवन्तौ



**हिमसंस्कृतवार्ताः** - केरल-राज्ये विपक्षस्य युनाइटेड डेमोक्रेटिक-फ़्रण्ट इत्यस्य द्वौ विधायकौ केरल-विधानसभायाः पुरतः विरोध-प्रदर्शनं कृतवन्तौ, सबरीमला-स्वर्ण-ग्रहण-प्रकरणस्य विषये देवस्वोम इत्यस्य-मन्त्रिणः त्यागपत्रं याचितवन्तौ। विपक्षस्य नेता वी. डी. सतीशनः प्रकरणस्य अन्वेषणे संलग्नस्य विशेष-अन्वेषण-दलस्य (एस. आई. टि.) इत्यस्य कार्ये मुख्यमन्त्री कार्यालयस्य हस्तक्षेपः आरोपितवान्। तेन घोषितं यत् विपक्षः स्वस्य विरोधप्रदर्शनं तीव्रतरं करिष्यति। मुख्यमन्त्री पिनरायी विजयन् इत्येषः विरोध प्रदर्शनम् अनुचितम् इति वर्णितवान् यत् सर्वकारस्य विरुद्धं नासीत्।

# मुख्यमन्त्री केन्द्रीय-नागरविमानन-मन्त्रिणा सह मिलितवान्; काङ्गडा-विमानपत्तनस्य विस्ताराय विशेषानुदानस्य याचना



**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खू महोदयः नवदेहल्यां केन्द्रीय-नागरविमानन-मन्त्रिणा (Civil Aviation Minister) राममोहन नायडूकिञ्जरापु महोदेन सह मेलनं कृतवान्। मेलने मुख्यमन्त्रिणा काङ्गडा-विमानपत्तनस्य विस्तारीकरणाय (Expansion) केन्द्रसर्वकारस्य सहयोगः, अस्यै परियोजनायै च 'विशेष- केन्द्रीय- सहायता' (Grant) दातुम् आग्रहः कृतः। सः अवदत् यत् काङ्गडाजनपदे पर्यटनस्य अपार-सम्भावनाः सन्ति, अतः अस्य विमानपत्तनस्य विस्तारः अनिवार्यः अस्ति।

## मुख्यमन्त्रिणा अन्याः प्रमुखाः याचनाः अपि उपस्थापिताः

**>दृश्यता-मापदण्डः-** (Visibility Standards): न्यूनदृश्यतायाः (Low Visibility) कालेऽपि उड्डयनं सुनिश्चितं कर्तुं 'विजुअल फ्लाइट् रूल्स' (VFR) इत्यस्य परिधौ न्यूनदृश्यतायाः मापदण्डं ५ किलोमीटरतः २.५ किलोमीटर पर्यन्तं कर्तुम् आग्रहः कृतः।

**> सुरक्षा-व्यवस्था-** कुल्लू-शिमला-विमानपत्तनयोः सुरक्षाभारं सी. आई. एस. एफ. (CISF) इत्यस्य स्थाने राज्य-आरक्षकेभ्यः (State Police) दातुं चर्चा कृता, येन राज्यस्य आर्थिकभारः न्यूनः भवेत्।

**> समय-वृद्धिः-** शिमला-विमानपत्तने उड्डयनस्य समयं वर्धयित्वा अपराह्णे ४:०० वादनपर्यन्तं कर्तुं अनुरोधः कृतः, येन उड्डयनानां सङ्ख्या वर्धेत। केन्द्रीयमन्त्रिणा काङ्गडा-विमानपत्तनस्य 'विस्तृत- परियोजना- प्रतिवेदनं' (DPR) सज्जीकर्तुं निर्देशः दत्तः राज्यसर्वकाराय पूर्णसहयोगस्य आश्वासनं च दत्तम्।

## मुख्यमंत्रिणः सुक्खोः नितिनगडकरी-महोदयेन सह मेलनम्; मार्गाय २०० कोटिरूप्यकाणां स्वीकृतिः

मुख्यमन्त्री सुक्खुः महोदयः केन्द्रीय-मार्गपरिवहन- राजमार्गमन्त्रिणा नितिनगडकरी महोदेन सह अपि मिलितवान्। अस्मिन् मेलने 'छैला- नेरीपुल -यशवन्तनगर- ओच्छघाट' मार्गस्य सुदृढीकरणाय २०० कोटिरूप्यकाणां सैद्धान्तिक- स्वीकृतिः दत्ता। अनेन प्रदेशस्य सेब-उत्पादक- कृषकाणां महती सहायता भविष्यति।

**मुख्यमन्त्रिणा अन्ये विषयाः अपि चर्चिताः-**

**१. सुरङ्ग-निर्माणम् (Tunnels)-** शिमला-मटौर राष्ट्रियमार्गे (NH) भौगोलिक-संवेदनशीलतां विचिन्त्य शिमलातः शालाघाट तथा भगेड़तः हमीरपुर पर्यन्तम् अधिकाधिकं सुरङ्गनिर्माणस्य आग्रहः कृतः।

**२. हमीरपुर-उपमार्गः-** 'पैकेज-४' अन्तर्गतं चतुष्पंक्तिमार्ग-निर्माणस्य 'डीपीआर' (DPR) कार्ये तीव्रतायाः अनुरोधः कृतः।

**३. एनएच-०३ पुनर्स्थापनम्-** चीलबाहलतः पक्काभरोह- खण्डपर्यन्तं मार्गस्य पुनर्स्थापनार्थं ३८.३७ कोटिरूप्यकाणां याचना कृता, या केन्द्रीयमन्त्रिणा स्वीकृता।

# नवदेहल्यां संसदभवनपरिसरे संसदः आयव्यय-सत्रात् पूर्वं रक्षामन्त्रिणः राजनाथसिंहस्य अध्यक्षतायां सर्वदलीय-सभा



**हिमसंस्कृतवार्ताः** - नवदेहल्यां संसदभवनपरिसरे संसदः आयव्यय-सत्रात् पूर्वं सर्वदलीय-सभा अभवत्। रक्षामंत्री राजनाथसिंहः अस्य सभायाः अध्यक्षः आसीत् । राज्यसभायाः सदनाध्यक्षः जे. पी. नड्डाः, संसदीयकार्यमन्त्री किरेन रिजिजू, संसदीयकार्यराज्यमन्त्री अर्जुनराम मेघवालः, डा. एल. मुरुगन च सभायां उपस्थिताः सन्ति। काङ्ग्रेस-नेता जयराम रमेशः, डी. एम. के-नेता तिरुचि शिवः, तृणमूल-काङ्ग्रेस नेता सागरिका घोषः, समाजवादी दलस्य सांसदः रामगोपाल यादवः अपि उपस्थिताः सन्ति। संसदः आयव्यय-सत्रम् अद्यारभ्य अप्रैल-मासस्य द्वितीय-दिनाङ्क-पर्यन्तं प्रचलति।

# जयरामठाकुरः अवदत्- मुख्यमन्त्री कथयेत्, उपमुख्यमन्त्रिणः विरुद्धं कीदृशान्वेषणं (Investigation) प्रचलति



**हिमसंस्कृतवार्ताः- शिमला।** पूर्वमुख्यमन्त्री विपक्षस्य नेता च जयरामठाकुरः अवदत् यत् मुख्यमन्त्री सुक्खू महोदयेन अस्पष्टोत्तराणां स्थाने स्पष्टं करणीयम् यत् वस्तुतः उपमुख्यमन्त्रिणः मुकेश अग्निहोत्री महोदयस्य विरुद्धं कीदृशी अन्वेषणप्रक्रिया (Investigation) प्रचलति। जयराममहोदयः कटाक्षं कुर्वन् उक्तवान् यत् मुख्यमन्त्री कदाचित् स्वासनरक्षणस्य भयेन एतं विषयं 'साधारणं पत्रम्' इति मत्वा उपेक्षते। विपक्षस्य नेता 'पूर्णराज्यत्वदिवसे' कृताः घोषणाः भ्रामकाः इति उक्तवान्। सः अवदत् यत् यदा राज्यस्य कोषः (Treasury) रिक्तः अस्ति, तदा मुख्यमन्त्री केवलं मतसङ्ग्रहाय (Vote bank) पुरातनपत्राणि पठित्वा जनतां छलयति। अधुना हिमाचलस्य जनानां सर्वकारस्य उपरि विश्वासः न जातः।

# भारत-यूरोपीयसङ्घस्य (EU) मुक्तव्यापार-सहमतिः एकः ऐतिहासिकः निर्णयः

जयरामठाकुरः प्रधानमन्त्रिणः नरेन्द्रमोदी महोदयस्य दूरदर्शीनेतृत्वस्य प्रशंसां कृतवान्। सः भारत- यूरोपीयसङ्घस्य मध्ये जातं 'मुक्तव्यापारसहमतिः' (FTA) देशस्य आर्थिकयात्रायां 'मीलस्तम्भः' इति वर्णितवान्।

**सहमतेः प्रमुखाः लाभाः-**

**१. विपणि-प्राप्तिः-** इयं सहमतिः भारतं २७ यूरोपीयदेशानां विशालविपण्या (Market) सह साक्षात् योजयति।

**२. कर-मुक्तिः-** भारतीय उत्पादानां ९९ प्रतिशतं भागे विशेषकर-सवलत् (Preferential access) प्राप्स्यते।

**३. क्षेत्रीय-लाभः** - अनेन कृषकाः समृद्धाः भविष्यन्ति, 'MSME' क्षेत्रं च सुदृढं भविष्यति।

**४. जीविका** - अनेन विनिर्माण-सेवाक्षेत्रेषु क्रान्तिः आगमिष्यति, येन युवकानां कृते नूतनाः जीविका-अवसराः सृज्यन्ते।

# मुख्यमन्त्री केन्द्रीय-पर्यावरणमन्त्रिणा सह मिलितवान्, हिमाचलस्य २९.५% वन- वृक्ष- आवरणं (Tree Cover) स्वीकर्तुम् आग्रहः



**हिमसंस्कृतवार्ताः- नवदेहली।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खूमहोदयः स्वीये देहलीप्रवासे नवदेहल्यां केन्द्रीय- पर्यावरण- वन-वायुपरिवर्तन- मन्त्रिणा भूपेन्द्रयादवमहोदेन सह मेलनं कृतवान्। मेलने मुख्यमन्त्रिणा राज्यस्य वास्तविकं वृक्ष-आवरणं (Tree Cover) २९.५ प्रतिशतम्, आधिकारिकरूपेण च अङ्कितं २७.९९ प्रतिशतं इत्यनयोः मध्ये विद्यमानस्य अन्तरस्य (Discrepancy) विषये सूचितम्। सः अवदत् यत् एषा विसङ्गतिः राज्यस्य वन-वृक्ष-गणनायां 'वनात् बहिः स्थितानां वृक्षाणां' (Trees Outside Forests- TOF) सम्मिलीकरणं न जातम् इत्यस्मात् उत्पन्ना अस्ति। राज्यसर्वकारेण निजी-भूमौ वृक्षाणां कर्तनार्थं कठोराः नियमाः कृताः सन्ति, परन्तु एतदर्थं केन्द्रसर्वकारतः किमपि प्रोत्साहनं राज्यं न प्राप्नोति।

**मुख्यमन्त्रिणा निम्नलिखितबिन्दवः उपस्थापिताः**

**१. पारिस्थितिक-योगदानम्-** अस्मिन् १.५ प्रतिशतं घटकं (TOF) हरित-आवरणे सम्मिलितं करणीयम्, येन राज्यस्य वास्तविकस्य पारिस्थितिक- वानिकी- योगदानस्य उचितं सम्मानं भवेत्।

**२. हिमालयीय-पारिस्थितिकी-** वनात् बहिः स्थिताः वृक्षाः हिमालयीयक्षेत्रस्य संवेदनशीलां पारिस्थितिकीं क्षरणात् (Erosion) रक्षितुं साहाय्यं कुर्वन्ति।

**३. वित्त-आयोग-आबंटनम्-** वित्त-आयोगेन अथवा केन्द्रसर्वकारेण क्रियमाणेषु सर्वेषु वित्तीय-आबंटनेषु हिमाचलस्य कृते २९.५ प्रतिशतं वन-वृक्ष-आवरणं मान्यं करणीयम्।

मुख्यमन्त्री उक्तवान् यत् ट्री-कवर-घटकस्य न्यून-आकलनं हिमाचलप्रदेशस्य वास्तविक-योगदानस्य अवहेलना अस्ति। एतेन तेषां राज्याणां प्रति पक्षपातः भवति, ये वनानां संरक्षणं प्राथमिकतां यच्छन्ति। केन्द्रीयमन्त्रिणा राज्यस्य प्रयासाणां प्रशंसा कृता, सर्वविध-सहयोगस्य च आश्वासनं दत्तम्। मेलनेअस्मिन् मुख्यमन्त्रिणः प्रधानपरामर्शदाता रामसुभगसिंहः अपि उपस्थितः आसीत्।

# Pride Moment- परमवीरचक्रविजेता सूबेदारः सञ्जयकुमारः सेनायां 'कैप्टन' (Captain) पदेन सुशोभितः



**हिमसंस्कृतवार्ताः- बिलासपुरम्।** भारतीयसेनायां सेवारतः, बिलासपुर-जनपदस्य झण्डूता- उपमण्डलस्य बकैण-ग्रामनिवासी, कारगिल- वीरः परमवीरचक्रविजेता सूबेदार सञ्जयकुमारः सम्प्रति 'कैप्टन' पदे पदोन्नतिं प्राप्तवान्। देहल्याः विजयचौकस्थाने गणतन्त्रदिवसस्य पावन- अवसरे सः अनेन वरिष्ठपदेन अलङ्कृतः।

अस्यां पदोन्नत्यां 'हिमाचलप्रदेश वैटर्न सैनिक कल्याण एवं विकास समिति' इत्यस्य प्रदेशाध्यक्षः वैटर्न कैप्टन बालकरामः शर्मा अन्ये च सदस्याः महतीं प्रसन्नतां प्रकटितवन्तः। कैप्टन बालकरामः शर्मा अवदत् यत् प्रायः 'परमवीरचक्रम्' सर्वोच्चबलिदानेन सह मरणोपरान्तं प्रदीयते, परन्तु कैप्टन सञ्जयकुमारः सः भाग्यशाली प्रथमसैनिकः अस्ति यः जीवितकाले एव अनेन सर्वोच्चसम्मानेन सम्मानितः अभवत्।परमवीरचक्रविजेता कैप्टन सञ्जयकुमारः स्वस्य अनुपमवीरतया, दृढसङ्कल्पेन, राष्ट्रं प्रति समर्पणेन च न केवलं भारतीयसेनायाः प्रत्येकं सैनिकं प्रति, अपितु देशस्य सर्वेभ्यः युवकेभ्यः अपि प्रेरणास्रोतः अस्ति।

# HP WEATHER- हिमाचले पुनः ऋतुपरिवर्तनम्; मनाली-कुफरी-प्रभृतिषु उच्चक्षेत्रेषु हिमपातः





**हिमसंस्कृतवार्ताः - शिमला।**
हिमाचलप्रदेशस्य अधिकांशभागेषु मङ्गलवासरे पुनः वर्षा-हिमपातयोः क्रमः आरब्धः। उच्चक्षेत्रेषु निरन्तरं हिमपातः भवति, येन फागू-कुफरी मार्गः यातायातार्थं स्थगितः जातः। नारकण्डा, चौपालस्य खिड़की तथा ठियोग-रोहडू मार्गेषु 'खडापत्थर' इत्यत्र स्खलन-कारणेन वाहनानां आवागमनं बाधितं वर्तते।

## विगत-२४ होरासु अङ्कितः हिमपातः (सेण्टीमीटर-मध्ये):

गोन्दलाः २२.०
कुकुमसेरीः २१.३
कोठीः २०.०
केलाङ्गः १२.५
कल्पाः ५.५



## अग्रिम्-ऋतु-पूर्वानुमानम्

ऋतुविज्ञानकेन्द्रानुसारं २७ जनवरी दिनाङ्के राज्यस्य बहुषु भागेषु मध्यमा वर्षा-हिमपातः च भविष्यति। चम्बा- कुल्लू- किन्नौर- लाहौलस्पीति जनपदेभ्यः 'नारङ्गवर्णीयसचेतना' कृता अस्ति। अन्यानां जनपदानामर्थे (यथा- ऊना, हमीरपुरं, शिमला) 'पीतसचेतना' अस्ति। १ फरवरी दिनाङ्के पुनः ऋतुपरिवर्तनस्य सम्भावना वर्तते, २९ जनवरी दिनाङ्के तु ऋतुः शुष्कः भविष्यति।

## सोलङ्गनाला-क्षेत्रे एक-पाद-परिमितः हिमपातः

पर्यटननगर्यां मनाल्यां पुनः हिमपातः आरब्धः। सोलङ्गनाला क्षेत्रे सोमवासररात्रौ एक- पाद- परिमितः (1 foot) हिमपातः जातः। मनाल्यां ५ इञ्च्, कोठी-क्षेत्रे च १२ इञ्च् हिमपातः अङ्कितः। यद्यपि जनजीवनं किञ्चित् बाधितं, परन्तु लोकनिर्माणविभागेन ९० प्रतिशतं मार्गाः पुनः उद्घाटिताः।

## अटल-कन्दरायां निरुद्धयोः पर्यटकयोः उद्धारः

आरक्षकैः (Police) अटलकन्दरायाः 'स्नो-गैलरी' मध्ये निरुद्धौ द्वौ पर्यटकौ सुरक्षितं निष्कासितौ। झारखण्ड- उत्तरप्रदेशनिवासी एतौ पर्यटकौ मङ्गलवासरे प्रातःकाले 'धुन्धी' समीपे हिमपाते निरुद्धौ आस्ताम्।

## विद्यालयेषु अवकाशः

हिमपातस्य कारणेन छात्राणां सुरक्षां विचिन्त्य कुल्लू- प्रशासनेन मनाली- बञ्जार उपमण्डलयोः सर्वेषु विद्यालयेषु अवकाशः घोषितः। कुल्लू- उपमण्डले अपि १३ विद्यालयाः पिहिताः भविष्यन्ति। उपायुक्तः तोरुल एस. रवीशः सर्वेभ्यः अधिकारिभ्यः सतर्कतां धारयितुं आदेशं दत्तवान्।

## होटल-स्वामिनां सहयोगः

मनाल्यां पर्यटकानां साहाय्यार्थं 'होटलियर एसोसिएशन' इत्यस्य अध्यक्षः रोशन ठाकुरः स्वव्ययेन 'जेसीबी' (JCB) यन्त्रम् आहूय मार्गेभ्यः हिमं दूरीकृतवान्, येन पर्यटकाः स्वहोटल-भवनं प्रति सुखेन गन्तुं शक्नुवन्ति।

# सार्थकयोगशालायां 'वन्दे मातरम्' योगमयकार्यक्रमस्य भव्यं आयोजनम्




**हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला, कोटद्वारम्।** गणतन्त्रदिवसस्य पावनावसरे, २६ जनवरी- सायंकाले, सार्थकयोगशालायां देशस्य वीरसैनिकानां सम्मानार्थं "वन्देमातरम्" इति शीर्षकेन योगमयः देशभक्तिपूर्णः कार्यक्रमः भव्यतया आयोजितः। अस्य कार्यक्रमस्य मुख्योद्देश्यः योगस्य माध्यमेन राष्ट्रनिर्माणं कर्तुं, सैनिकानां च प्रति कृतज्ञताभावं प्रकटयितुं आसीत्। अस्मिन् अवसरे योगसाधकैः उत्साहपूर्वकं सहभागिता कृता। तैः विविधयोगासनानि, सामूहिक-योगप्रदर्शनं, देशभक्तिभावेन परिपूर्णाः प्रस्तुतयः प्रदर्शिताः। योगमयप्रस्तुतिभिः उपस्थितैः साधकैः दर्शकैश्च भारतीयसेनायाः शौर्यं, बलिदानं च राष्ट्रसेवां प्रति नमनं कृतम्। कार्यक्रमकाले सम्पूर्णं वातावरणं देशभक्तिजयघोषैः तथा "वन्दे मातरम्", "जय हिन्द" इत्युद्घोषैः प्रतिध्वनितम्। आयोजकैः कथितं यत् योगः केवलं शारीरिकस्वास्थ्यं न प्रददाति, अपि तु मानसिकसशक्ततां राष्ट्रप्रेमभावनां च सुदृढीकरोति। कार्यक्रमस्य संयोजकः राकेश कण्डवालः, सार्थकयोगशालायाः अध्यक्षा कविता कण्डवालः, प्रशिक्षकाः सोनमरावतः, शुभमरावतः, सन्तोषीरावतः, अभिभावकाः एवं संस्कृतभारत्याः पौड़ीविभागसंयोजकः कुलदीपमैन्दोला च एते सर्वे समापनावसरे सर्वान् प्रतिभागिनः पदकैः (मेडलैः) सम्मानितवन्तः। ततश्च अभिभावकैः बालकेभ्यः मिष्ठान्नवितरणं कृतं, यत् कार्यक्रमस्य गरिमां सहभागितां च अधिकं शोभितवान्।
अस्मिन् अवसरे "योगेन राष्ट्रनिर्माणम्", "स्वस्थं तनुः – सशक्तं मनः" चेति सन्देशः जन- जनं प्रति प्रेषितः। अयं कार्यक्रमः उपस्थितेषु सर्वेषु देशप्रेम्णः, सामाजिकदायित्वभावनायाः अधिकं प्राबल्यं जनितवान्।

# अक्षयकुमारस्य 'वेलकम टू द जंगल' इत्यस्य प्रसारणतिथ्याः घोषणा जाता



**हिमसंस्कृतवार्ताः- जगदीश डाभी, मुम्बई।** प्राप्तवार्तानुसारं बॉलीवुड-नायकस्य अक्षय कुमारस्य 'वेलकम टू द जंगल' इत्यस्य प्रसारणतिथ्याः घोषणा जाता। अक्षयकुमारस्य सम्प्रतिः अनेकानि चलच्चित्राणि सन्ति, तेषाम् अक्षय कुमारः चित्रोतलन-कार्ये च निरन्तरं व्यस्तः वर्तते। प्रतिवर्षमिव अक्षयः अस्मिन् वर्षे अपि ४-५ चलच्चित्रेषु अभिनयं कर्तुं शक्नोति इति अपेक्षा अस्ति। अक्षयकुमारस्य "हैवान", "भूतबङ्गला" इत्यादीनि चलच्चित्राणि अस्मिन् वर्षे प्रदर्शितानि भविष्यन्ति। अधुना अक्षयकुमारस्य "वेलकम् टू द जंगल" इति वेलकम इत्यस्य तृतीयं चलच्चित्रमस्ति। इति 'वेलकम टू द जंगल' इत्यस्य प्रसारणतिथ्याः घोषणा जाता। अस्मिन् वर्षे अपि एतत् चलच्चित्रं प्रदर्शितं भविष्यति। अस्मिन् चलच्चित्रे अक्षय कुमारः, अरशद वारसी, सुनील शेट्टी, अनिल कपूरः, अन्यप्रमुखाः नामका- नायिकाः च दर्शनं दास्यन्ति। बहु-अभिनेता- हास्य- चलच्चित्रम् अस्ति। अधुना एव चलच्चित्रस्य चित्रोतलनं पूर्णम् अभवत्। अतः अधुना प्रसारणतिथ्याः संबंधिता महती घोषणा जाता। चलच्चित्रं २०२६ तमेवर्षे जूनमासस्य २६-दिनांके प्रेषागृहेषु प्रसारितं भविष्यति।

# युवराजद्वयम् ऐतिहासिकं कामेश्वरधार्मिकन्यासस्य न्यासकर्तृपदं गणतन्त्रोत्सवे स्वीकृतवन्तौ



हिमसंस्कृतवार्ताः- राघव नाथ झा, दरभङ्गा। गणतन्त्रभारतस्य सप्तसप्तातितमे (७६) जन्मदिवसे २६ जनवरी २०२६ इत्यस्मिन् पावनेऽवसरे ऐतिहासिकः सामाजिकः सांस्कृतिकश्चोत्सवः दरभङ्गानगरेऽभवत्। मिथिलानरेशेन सर्वश्रीमता महाराजाधिराजेन डॉ. कामेश्वरसिंहेन विस्मृतिं नीतायाः धार्मिक- सांस्कृतिक- चेतनायाः पुनरुत्थानाय सन् १९४९ तमे ख्रीष्टाब्दे संस्थापितस्य कामेश्वर- धार्मिक- न्यासस्य (के.आर.टी.) न्यासकर्तृपदभारं दरभङ्गाराजवंशस्य युवराजकुमार राजेश्वरसिंहः युवराजकुमार कपिलेश्वरसिंहश्च विधिवत् स्वीकृतवन्तौ।अस्य न्यासस्य अधीनं भारत- पाकिस्तान- बाङ्ग्लादेशेषु विस्तृते अष्टोत्तरशतं (१०८) मन्दिराणि सन्ति। पदग्रहणात् पूर्वं युवराजद्वयं माधवेश्वरपरिसरे स्थितेषु विविधेषु देवालयेषु प्रार्थनां कृत्वा पूर्वजान् स्मृतवन्तौ। तैः स्वीयपितामहीं महाराणीं कामसुन्दरीसाहिबाम् स्मृत्वा तस्याः समाधौ भावपूर्णं नमनमपि कृतम्। तदनन्तरं रामबागपरिसरे स्थितायां कुलदेव्यां कङ्काल्यां प्रणम्य स्वगोस्वामिनः (गोसाउँ) समीपात् आशीर्वादं प्राप्तवन्तौ। न्यासस्य अधीनानि सर्वाणि मन्दिराणि अस्मिन् दिवसे उत्सवदृश्यैः सुशोभितानि आसन्। रामबागस्थे राजनिवासेऽपि विशेषोत्सवस्य आयोजनम् अभवत्।

## युवराजद्वयस्य उद्घोषः

माध्यमकारैः सह संवादे युवराजद्वयम् अवदत् यत् न्यासाधीनानां मन्दिराणां धार्मिकसम्पत्तीनां च संरक्षणं, संवर्धनं, सुव्यवस्था च तेषां सर्वोच्चा प्राथमिकता भविष्यति। मन्दिरव्यवस्थाम् अधिकं सुदृढां पारदर्शिकां च कर्तुं शीघ्रमेव ठोसाः कार्ययोजनाः कार्यान्विताः भविष्यन्ति। माधवेश्वरपरिसरे स्थितस्य लक्ष्मीश्वरीतारामन्दिरस्य यथा जीर्णोद्धारः कृतः, तथैव अन्येषामपि मन्दिराणां जीर्णोद्धार- नवीनीकरणकार्याणि प्रगतिमन्ति भविष्यन्ति। दरभङ्गाराज्यस्य धार्मिक- सांस्कृतिक- पर्यटनमानचित्रेऽपि एतेषां स्थलानां विशेषविकासस्य योजना अस्ति।

## भविष्ययोजनाः

युवराजाभ्यां घोषितं यत् मिथिलायां लुप्तप्रायाः कतिपयाः पारम्परिकाः पूजापद्धतयः धार्मिक- कर्मकाण्डाश्च पुनः प्रचलिताः भवेयुः। एतत् कृत्वा समकालीनाः भाविन्यश्च पीढ्यः अस्या महान् सांस्कृतिकपरम्परायाः गौरवं ज्ञातुं शक्ष्यन्ति। अभिलेखीयपुरातात्त्विकदृष्ट्या मन्दिराणां संरक्षणं न्यासस्य प्रथमदायित्वं स्यात्। न्याससम्पत्तीनां निरीक्षणं भूमिविवादानां निवारणं च प्रमुखतः भविष्यति। अस्मिन् ऐतिहासिककार्यक्रमे पूर्वविभागाध्यक्षः डॉ. हेमपति झा, राजदरभङ्गस्य प्रबन्धकसहसचिवः आशुतोष दत्तः, शिवनाथ झा, भाजपावरिष्ठनेत्री मीना झा, मंजेशचौधरी, आशीष झा, ठाकुरभूपेन्द्रः, सुधांशु झा, संतोषसिंहः, राजीवप्रकाश मधुकरः, प्रियांशुझा, डॉ. गोपालजी ठाकुरः, सुनील रायः, राजूमण्डलः, प्रदीप गुप्तः, साईं निरुपमः, सुभाष यादवः, सत्यम कुमारः, बबलू, विजय चौधरी, इसनाथ झा, मनोज साह, रंजन शर्मा, कन्हैया दुबे, विजय झा, आयुष वैभवः, जितेन्द्र ठाकुरः, रामकृष्णलाल दासः, मुकेशः, प्रभाकरः, दीपकः इत्यादयः शताधिकाः गण्यमानाः जनाः उपस्थिताः आसन्। एतत् पदभारग्रहणं केवलं परम्परायाः निर्वहणं न, अपि तु मिथिलायाः गौरवशालिन्याः धार्मिक- सांस्कृतिक- विरासतेः संरक्षणस्य नूतनायाः युगस्यारम्भः इति सर्वे मन्यन्ते। युवराजद्वयस्य मार्गदर्शने न्यासः समृद्धिमान् भवित्वा जनसेवायां निरतो भविष्यति इति विश्वासः व्यज्यते।

# उत्तराखण्डसंस्कृत-अकादम्याः प्रदर्शनी राज्यस्तरे द्वितीयं स्थानं प्राप्तवती

### त्रयोदशसंस्कृतग्रामाणां च ग्रामीणपरिवेशस्य दृश्यम् आसीत् आकर्षकम्। महामहिमराज्यपालः ले. ज. गुरमीतसिंहवर्यः अभिनन्दितवान् प्रदर्शनीम्






हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला हरिद्वारम्।गणतन्त्रदिवसपर्वणि आयोजिते संचलने उत्तराखण्ड- संस्कृत- अकादम्या प्रदेशे सञ्चालितानां त्रयोदश आदर्शसंस्कृतग्रामाणां विषयम् आधारीकृत्य संस्कृतविभागस्य प्रदर्शनी सजीवरूपेण प्रदर्शिता। अस्यां प्रदर्शिन्यां ग्रामवासिभिः वैदिकयज्ञ-पूजनम्, सामूहिक- संस्कृत- सम्भाषणकक्षाः, ऊखल- कूटनं, हस्तपेषण- चक्रचालनं कुर्वन्तीनां महिलानां तथा पर्णग्रासस्य संस्कृतभाषायां संवादः सजीवतः निरूपितः। गढ़वाली- कुमौ- जौनसारी- चमोलीप्रदेशीय- वेषभूषाभिः अलङ्कृतैः महिला- पुरुष- बालकैः संस्कृतभाषायां संवादैः सह “जयतु संस्कृतम्, जयतु भारतम्” इत्युद्घोषैः यदा प्रदर्शनी राजपथसम्मानितमञ्चं प्रति प्रविष्टवती, तदा मञ्चे उपविष्टाः प्रदेशस्य महामहिमराज्यपालः लेफ्टिनेन्ट् जनरल् गुरमीतसिंहः, मुख्यमंत्री पुष्करसिंहधामी, पूर्वमुख्यमंत्री भगतसिंहकोश्यारी च शासन- प्रशासनस्य अधिकारी- कर्मचारिणः सर्वे दर्शकाः च करतलध्वनिना संस्कृतप्रदर्शनीम् अभिनन्दितवन्तः। संस्कृतप्रदर्शन्यां संस्कृतग्रामाणां विविधाः क्रियाकलापाः ग्रामवासिभिः सजीवरूपेण प्रदर्शिताः। अनया प्रदर्शन्या राज्यस्तरे द्वितीयं स्थानम् प्राप्तम्। अस्मिन् अवसरे संस्कृतशिक्षासचिवः दीपककुमारः, अकादम्याः सचिवः प्रो. मनोजकिशोरपन्तः, शोधाधिकारी डॉ. हरिश्चन्द्रगुरुराणी, प्रकाशनाधिकारी किशोरीलाल रतूड़ी, डॉ. गणेशप्रसाद फोन्दणी, मनोज शर्मा, आशाराम मैठाणी, सत्यप्रसादखण्डूरी, नवीनभट्टः, माधव पौडेलः, दुर्गेश प्रसादः, पुनीत कुमारः, डॉ. करुणा गुप्ता, अरुणदीप पन्तः, ललिता भट्टा, मोहितः, सन्तोषः इत्यादयः बहवः गणमान्याः उपस्थिताः आसन्।

# धौतवस्त्रं-करांशुकं धारयन्तः वेद-छात्राः क्रिकेटक्रीडां क्रीडितवन्तः, संस्कृतविवरेण अभवत् प्रसारणम्



वाराणसी । धार्मिकनगरे काशीनगरे वेदछात्राः संस्कृतछात्राः च पारम्परिकधौतवस्त्रेण करांशुकेन च क्रिकेट्-क्रीडां कृतवन्तः, येन मंगलवासरे क्रीडायाः संस्कृतेश्च च अद्वितीयं मिश्रणं प्रस्तुतम्। ध्यातव्यमस्ति यत् पारम्परिकपरिधानैः सह क्रीडायाः प्रसारणमपि संस्कृतभाषया एव अभवत्, येन प्रेक्षकाः विशेषतया आकृष्टाः अभवन् । शास्त्रार्थमहाविद्यालयस्य (दशाश्वमेध) ८२ तमे स्थापनादिवसस्य अवसरे रेवडीतडागस्थे जयनारायणघोषान्तरमहाविद्यालयस्य क्रीडाङ्गणे "संस्कृतक्रिकेटप्रतियोगिता" आयोजिता। प्रतियोगितायां चत्वारि दलानि भागं गृहीतवन्तः। सर्वे क्रीडकाः धौतवस्त्रेण-करांशुकेन, त्रिपुण्ड्, चन्दनतिलकं, रुद्राक्ष- मणिं च धारयित्वा क्रीडाङ्गणं गृहीतवन्तः, निर्णायका अपि तथैव पारम्परिकवेषं धारयन्ति स्म।अस्मिन् अष्टचक्रीय-क्रीडायां प्रत्येकं कन्दुकक्षकेपकं द्वे-द्वे चक्रे कन्दुकक्षेपणार्थं शक्नोति स्म, उभयतः फलकक्रीडा च भवति स्म । संस्कृतभाषायां प्रचलितं प्रसारणं अस्य मेलनाय विशिष्टं चरित्रं दत्त्वा प्रेक्षकान् आकर्षयति स्म , आयोजकः महाविद्यालयस्य प्राचार्यः च डॉ. पवनकुमारशुक्लः अवदत् यत् अस्य आयोजनस्य उद्देश्यं वेदस्य अध्ययनं कुर्वन्तः छात्राः केवलं धार्मिककार्येषु एव सीमिताः न सन्ति, अपितु क्रीडायां अपि पूर्णतया समर्थाः सन्ति इति सन्देशं प्रसारयितुं आसीत्। सः अपि अवदत् यत् छात्राणां सर्वाङ्गविकासाय विद्यालये नियमितरूपेण एतादृशाः कार्यक्रमाः आयोजिताः भवन्ति। विजेतारः सहभागिनः च दलानि ३० जनवरी दिनाङ्के सम्मानिताः भविष्यन्ति।

# क्रीडाङ्गणधूलितः राष्ट्रियस्तरपर्यन्तम्- कोटद्वारस्य “यष्टि-वीराङ्गनाः” अधुना रांचीनगरे स्वकौशलं प्रदर्शयिष्यन्ति!



**हिमसंस्कृतवार्ताः कुलदीपमैन्दोला कोटद्वारम्**।इतिहासः साक्षी अस्ति यत् यदा-यदा पर्वतीयप्रदेशस्य कन्याः स्वशक्तेः परिचयं कृतवत्यः, तदा जगत् नत्वा ताः अभिवन्दितवान्। कोटद्वारस्य मोटाढाक-लघुक्रीडाङ्गणस्य साधारणं भूमिखण्डम् अद्य तादृशं चमत्कारं कृतवान्, येन समग्रं उत्तराखण्डं गर्वेण हर्षोन्मत्तं जातम्। षट् कन्याः एकलक्ष्यभावं हृदि पदं निधाय राष्ट्रस्तरीयदले धैर्येण प्रवेशः कृतः अधुना समग्रदेशस्य दृष्टिः एतासु एव! घमण्डपुरस्थितस्य जी. जी. आई. सी. विद्यालयस्य षट् प्रतिभाशालिन्यः बालिकाः स्वपरिश्रमबलात् उत्तराखण्डस्य राष्ट्रिय-अण्डर–१७ हॉकी-दलस्य द्वारं भित्त्वा स्वाधिकारं प्राप्तवत्यः। एताः कन्याः आगामि २४ जनवरीतः ४ फरवरीपर्यन्तं झारखण्डराज्यस्य रांची-नगरे उत्तराखण्डस्य मानं, आशां च प्रतिनिधित्वं कृत्वा क्रीडाङ्गणे स्वजीवनं समर्पयिष्यन्ति। एतासां हस्तेषु विजयस्य दीप ज्योतिः ।एतानि नामानि साक्ष्यं ददति यत् सिंहिन्यः केवलं वनेषु न, अपि तु क्रीडाङ्गणेऽपि राज्यं कुर्वन्ति- निकिता (भूमिप्रकाश भट्टस्य पुत्री) अक्षिता नेगी (रतनसिंह नेगीवर्यस्य पुत्री)अंकिता रावतः (सुनीलसिंह रावतस्य पुत्री) गुंजन (शिवकुमारस्य पुत्री) पीहू रावतः (जयपालसिंह रावतस्य पुत्री) मोटाढाक-लघुक्रीडाङ्गणस्य हॉकी- प्रशिक्षकस्य तेजेन्द्र रावतस्य सान्निध्ये कठोरपरिश्रमेन, निष्ठया च, क्रीडायाः सूक्ष्मताः अवगम्य सततं कौशलवर्धनाय संघर्षशीलः सः आसीत्। अद्य तस्य धैर्यस्य, लग्नस्य च फलरूपेण कोटद्वारस्य बालिकाः राष्ट्रस्तरे स्वप्रतिभां प्रदर्शयितुं सिद्धाः सन्ति। यदा जनाः शय्यायां उष्णतां अनुभवन्ति स्म, तदा तीव्रशीतकाले तुषारकणानां मध्ये प्रशिक्षकः तेजेन्द्र रावतः एताः कन्याः भावियुद्धाय सज्जीकरोति स्म। गतयोः द्वयोः वर्षयोः प्रत्येकः क्षणः, प्रत्येकं अश्रु, प्रत्येकः स्वेदबिन्दुः अद्य “नेशनल जर्सी” इत्यस्य महिमायाः कारणं जातम्। एषा सफलता तेषां सर्वेषां निन्दानां, बाधानां च प्रहारः अस्ति ये कन्यापादेषु शृङ्खलाः बद्धु इच्छन्ति।

प्रसारमाध्यमप्रभारी शिवम-नेगीस्य प्रेरणादायकः सन्देशः- “एताः कन्याः केवलं क्रीडनाय न गच्छन्ति, अपि तु उत्तराखण्डस्य स्वाभिमानस्य ध्वजं रोपयितुं प्रस्थिताः। एतासां समीपे सौविध्यप्रासादाः न आसन्, किन्तु एतासां हृदये तादृशं साहसं अस्ति यत् हिमालयादपि उन्नतम्। रांची-भूमिः साक्षी भविष्यति यत् यदा कोटद्वारस्य कन्याः क्रीडाङ्गणे अवतरन्ति, तदा विरोधिनां पादाः भूमिं त्यजन्ति। एषः विजयः तासां सर्वासां कन्यानां कृते आह्वानम् अस्ति याः स्वप्नदर्शनात् भीताः सन्ति। उत्तिष्ठत! पश्यत! भवत्यः स्वसाराः जगत् जेतुं प्रस्थिताः सन्ति।”

कोटद्वारस्य हुंकारः ‘विजयी भव’। समग्रं नगरम् अद्य एकं कुटुम्बं जातम्। कोटद्वारस्य प्रत्येकः पन्थाः एतासां कन्यानां विजयार्थं प्रार्थनाभिः निनादति। क्रीडासङ्घटनानि गर्वेण अवदन्- “कन्याः, गच्छत! तिरङ्गस्य गौरवं वर्धयत। वयं भवतां विजयस्य स्वागताय पलकान् विस्तारितवन्तः स्थिताः स्मः।”

हुंकारा अस्माकं, विजयः भवताम्!

# शोधविभूषणम् इत्युपाधिना विभूषितः डॉ. गणेशहेगडे






**हिमसंस्कृतवार्ता।** गुजरातराज्यस्य वेरावलस्य श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य शोधछात्रेण गणेशहेगडे इत्यनेन समर्पितस्य “नारायणतीर्थविरचितस्य अद्वैतरत्नाकरग्रन्थस्य सम्पादनं समीक्षात्मकं अध्ययनञ्च” इत्याख्यस्य महाशोधप्रबन्धस्य कृते विश्वविद्यालयेन पीएचडी-विद्यावारिधिरिति उपाधिना सम्मानितम्। श्रीहेगडे विगतवर्षत्रयात् विश्वविद्यालयस्य दर्शनविभागाध्यक्षस्य डॉ. जानकिशरणाचार्यस्य समर्थमार्गदर्शने पाण्डुलिपिस्थग्रन्थस्य अनुसन्धानसम्पादनात्मकं कार्यं कुर्वन्नासीत् । श्रीसोमनाथसंस्कृतविश्वविद्यालये सम्पन्ने अष्टादशे दीक्षान्तसमारोहे कुलाधिपः गुजरातस्य गौरवान्वित-राज्यपालः श्रीमान् आचार्यदेवव्रतवर्यः, विश्वविद्यालयस्य कुलपतेः प्रो. सुकान्तकुमारसेनापतिवर्यस्य सारस्वतातिथेः श्रीलालबहादूरशात्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलपतेः प्रो.मुरलीमनोहरपाठकवर्यस्य च उपस्थितौ इमम् उपाधिम् प्रदत्तवान् । अस्मिन्नवसरे श्रीगणेशहेगडे ऐषमः “शोधविभूषणम्” इति सर्वश्रेष्ठशोधप्रबन्धपुरस्कारेण अथ स्वर्गीय मणिशङ्करजीवनरामपाण्ड्यापुरस्कारेण च सभाजितः । कर्णाटकराज्यस्य शिरसि इत्यस्य अमचिमनेग्रामे निवसतोः श्रीमती ललिता हेगडे श्रीरमेशहेगडे दम्पत्योः पुत्रोऽयं डॉ. गणेशहेगडे नवदिल्लीस्थे दिल्लीकन्नडवरिष्ठमाध्यमिकविद्यालये संस्कृताध्यापकत्वेन कार्यरतः अस्ति । विगतवर्षत्रयाद् असौ नवदिल्लीस्थ-प्रसारभारत्यां संस्कृतवार्ता-प्रवाचकरूपेणापि कार्यं करोति ।

# "लौकिकन्यायकोशः"
# "मणिप्रदीपप्रभान्यायः"

क्वचित् एकस्य मन्दिरस्य अन्तः दीपः स्थापितः। सः ज्वलति स्म। दूरतः तस्य दीपस्य वर्तुलाकारं प्रकाशम् अवलोक्य जनानां मणिभ्रमः भवितुम् अर्हति स्म। तस्य समीपस्थे मन्दिरान्तरे एकं रत्नम् आसीत् तस्यापि वर्तुलाकारप्रकाशेन मणिज्ञानं भवति स्म। एकदा द्वौ जनौ दूरात् एतं प्रकाशम् अवलोक्य रत्नभ्रमेण तत्र धावित्वा गतौ। एकः रत्नं प्राप्तवान् अपरः दीपं प्राप्तवान्, न रत्नम्। एवं मणिप्रभायाः आधारेण जाता मणिभावना संवादिभ्रम इति दीपप्रभायाः आधारेण जाता मणिभावना च विसंवादिभ्रम कथ्यते।

यथा-

**"स्वयं भ्रमोऽपि संवादी यथा सम्यक्फलप्रदः।**
**ब्रह्मतत्त्वोपासनाऽपि तथा मुक्तिफलप्रदा।"**

**डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। नोयडानगरे महद्-भयम् अनुभूतम्। कुत्रचित् आवासे "वितरण"-भ्रान्त्या कलहः जातः। तत्र लोह-दण्डैः प्रहारः कृतः।

**नन्दिनी-** एतत् तु हिंसात्मकम्। चीनदेशे अपि कष्टं जातम्। सख्याः विवाहे कृशा भवितुम् एकया युवत्या अत्यन्त- उपवासः कृतः। तया "मधुमेहपूर्व" दशा प्राप्ता।

**काव्या-** अहो! आरोग्यम् एव नष्टम्। अस्माकं देशे तु विज्ञानं पूजितम्। "गणतन्त्रदिवसे" गूगलचित्रेण भारतस्य अन्तरिक्षकार्यं सम्मानितम्।

**नन्दिनी-** गर्वस्य विषयः एषः। बेङ्गलूरुनगरे "ब्लिङ्किट" संस्थायाः उत्तमं कार्यं दृष्टम्। रात्रौ औषधस्य आदेशे दत्ते सति, वैद्येन दूरवाणी कृता, विवरणं च गृहीतम्।

# पति-पत्न्योः मध्ये हासपरिहासम्

**पत्नी-** एकां वार्तां प्रष्टुं शक्नोमि वा?
**पतिः-** आम्, अवश्यमेव।
**पत्नी-** यदि भवतः शिरसि मम वार्तायाः कारणात् वेदना भविष्यति तर्हि भवान् मम वार्तां श्रोष्यति?
**पतिः-** आम् आम्, अहम् अवश्यमेव श्रोष्यामि।
**पत्नी-** मम वार्तायाः कारणात् भवतः शिरसि वेदना भवति किम्? 😳😳🧹🧹
**पतिः-** 😳😳😳😳😳😳

# गणतन्त्रभारतसमीक्षा -डॉ विमलेश झा

डॉ विमलेश झा, डीएवी पब्लिक स्कूल बरारी, भागलपुर,बिहार

भारतदेशस्य सभ्यता विश्वस्य प्राचीनतमेषु सभ्यतासु अन्यतमा अस्ति। अस्य देशस्य इतिहासः वैदिककालादारभ्य आधुनिककालपर्यन्तं विस्तीर्णः, गौरवपूर्णः च अस्ति। सिन्धुसभ्यतायाः आरभ्य गुप्त, मौर्य, शुङ्ग, कुषाण, पाल, चोल, मुगल इत्यादीनां राजवंशानां कालं यावत् भारतदेशः ज्ञान-विज्ञान-कला-संस्कृतिभिः समृद्धः आसीत्। परन्तु अष्टादश-उनविंशतिशतकयोः औपनिवेशिकशक्तिभिः भारतदेशः परतन्त्रतायाः बन्धने बद्धः अभवत्। दीर्घसंघर्षानन्तरं १९४७तमे वर्षे अगस्तमासस्य पंचदशदिनांके भारतदेशः स्वतन्त्रः अभवत् । तथापि केवलं स्वातन्त्र्यप्राप्तिः एव राष्ट्रनिर्माणस्य अन्तः न आसीत्, अपि तु सुदृढा, न्याययुक्ता, लोकहितकारी शासनव्यवस्था निर्मातव्या आसीत्। एतस्याः आवश्यकतायाः पूर्त्यर्थं भारतदेशः १९५०तमे वर्षे जनवरीमासस्य षडविंशतिदिनांके गणतन्त्ररूपेण प्रतिष्ठितः। एषः दिवसः भारतीयइतिहासे स्वर्णाक्षरैः अङ्कितः अस्ति।

गणतन्त्रस्य अर्थः अवधारणा च 'गणतन्त्र' इति शब्दः संस्कृतभाषायाः अमूल्यरत्नम् अस्ति। 'गण' इति जनसमूहस्य, नागरिकसमाजस्य वा सूचकः, 'तन्त्र' इति शासनप्रणाल्याः, व्यवस्थायाः च द्योतकः। यस्मिन् राज्ये शासनसत्ता राज्ञः अथवा केचन सीमितजनाः न धारयन्ति, अपि तु सर्वे नागरिकाः सामूहिकरूपेण सत्तायाः स्रोतः भवन्ति, तत् राज्यं गणतन्त्रम् इति कथ्यते। प्राचीनभारते अपि गणराज्यपरम्परा आसीत्। वैशालीस्थितं लिच्छविगणराज्यम्, कपिलवस्तु, कुशीनगरम् इत्यादीनि गणराज्यानि बौद्धकालीनग्रन्थेषु उल्लिखितानि सन्ति। एतेन स्पष्टं भवति यत् गणतन्त्रस्य मूलभावना भारतीयसंस्कृतेः गर्भे एव निहिता आसीत्। भारतीयस्वतन्त्रतान्दोलनं केवलं राजनैतिकसंघर्षः न आसीत्, अपि तु सामाजिक-सांस्कृतिक-पुनर्जागरणात्मकम् आन्दोलनम् आसीत्। महात्मागान्धी अहिंसासत्याग्रहयोः माध्यमेन जनसामान्यं जागरूकं कृतवान्। लोकमान्यतिलकः, लाला लाजपतरायः, सुभाषचन्द्रबोसः, भगतसिंहः इत्यादयः क्रान्तिकारिणः राष्ट्रप्रेम्णः अद्भुतानि उदाहरणानि प्रदर्शितवन्तः। विविधभाषिकसांस्कृतिकविविधतायुक्ते समाजे एकं समानं संविधानं निर्मातुं महती आवश्यकता आसीत्।

१९४६ तमे वर्षे गठिता संविधानसभा भारतीयलोकतन्त्रस्य आधारशिला आसीत्। अस्याः सभायाः अध्यक्षः डॉ. राजेन्द्रप्रसादमहाशयः आसीत्, प्रारूपसमितेः अध्यक्षः डॉ. भीमराव अम्बेडकरमहोदयः आसीत्। अम्बेडकरमहोदयः सामाजिकन्यायस्य, समतायाः, अस्पृश्यतानिवारणस्य च प्रबलसमर्थकः आसीत्। दीर्घकालीनविमर्शानन्तरं १९४९ तमे वर्षे नवम्बरमासस्य षडविंशतिदिनांके संविधानं स्वीकृतम्, १९५० तमे वर्षे जनवरीमासस्य षडविंशतिदिनांके प्रवर्तितं च। भारतीयसंविधानं विश्वस्य दीर्घतमं लिखितसंविधानम् अस्ति। अस्मिन् संविधानस्य प्रस्तावना अत्यन्तं महत्त्वपूर्णा अस्ति। प्रस्तावनायां "वयं भारतस्य जनाः, भारतं सम्पूर्णप्रभुत्वसम्पन्नं, समाजवादीं,सम्प्रदायनिरपेक्षं, लोकतन्त्रात्मकं गणराज्यं विधातुं,तस्य समस्तान् नागरिकांश्च
सामाजिकं, आर्थिकं, राजनैतिकं च न्यायम्,विचारस्य, अभिव्यक्तेः, आस्थायाः, धर्मस्य,उपासनायाश्च स्वातन्त्र्यम्,प्रतिष्ठायाः, अवसरस्य च समतां प्रापयितुं; तेषु सर्वेषु चव्यक्तिगौरवस्य राष्ट्रस्य एकतायाः,अखण्डतायाश्च सुनिश्चायिकां बन्धुतां वर्धयितुं कृतदृढसङ्कल्पाः अस्यां अस्मदीयायां संविधानसभायां अद्य ख्रिस्तीये १९४९तमे वर्षे नवम्बर-मासस्य २६ तमे दिने(२००६तमे विक्रमसंवत्स्य मार्गशीर्ष-शुक्लपक्षे सप्तम्यां तिथौ)एतेन इदं संविधानम् अंगीकृतं, अधिनियमितं,आत्मार्पितं च कुर्महे" इति लिखितम् अस्ति।







प्रस्तावनायां भारतदेशं सम्पूर्णप्रभुत्वसम्पन्नं समाजवादी धर्मनिरपेक्षं लोकतान्त्रिकं गणराज्यम्' इति घोषितम्। संविधानस्य मूलतत्त्वानि न्यायः, स्वतन्त्रता, समता, बन्धुत्वं च राष्ट्रजीवनस्य मार्गदर्शकाः सन्ति। भारतीयसंविधानं संघीयव्यवस्थां स्वीकृत्य अपि केन्द्रीयसत्तां सुदृढां करोति। केन्द्रराज्ययोः मध्ये शक्तिविभाजनं संविधानस्य प्रमुखं वैशिष्ट्यम् अस्ति। अनुच्छेदाः, अनुसूच्यः, परिशिष्टानि च अस्य संविधानस्य व्यवस्थितरचनां दर्शयन्ति। मौलिकाधिकाराः भारतीयलोकतन्त्रस्य प्राणतत्त्वानि सन्ति। संविधानस्य तृतीयभागे मौलिकाधिकाराणां विवेचनं कृतम् अस्ति। समानतायाः अधिकारः जाति-धर्म-लिङ्ग-भाषाभेदं विना सर्वेभ्यः समानव्यवहारं सुनिश्चितं करोति। स्वतन्त्रतायाः अधिकारः विचार-व्यक्ति-लेखन-आन्दोलन-व्यवसायस्वातन्त्र्यं प्रददाति। धर्मस्वातन्त्र्यस्य अधिकारः सर्वधर्मसमभावं प्रतिपादयति। शोषणविरोधी अधिकारः बालश्रम-मानवव्यापारादीनां निषेधं करोति। शिक्षासांस्कृतिकाधिकाराः अल्पसंख्यकानां संरक्षणं कुर्वन्ति। संवैधानिकोपायस्य अधिकारः न्यायालयद्वारा अधिकाररक्षणं सुनिश्चितं करोति। राज्यस्य नीति-निदेशकतत्त्वानि नीति-निदेशकतत्त्वानि संविधानस्य चतुर्थभागे उल्लिखितानि सन्ति। एतानि न्यायालयेन बाध्यकारकाणि न सन्ति, तथापि राज्यस्य नैतिककर्तव्यरूपेण स्वीकृतानि सन्ति। सामाजिक-आर्थिकन्यायः, समानवेतनव्यवस्था, ग्रामस्वराज्यव्यवस्था, सार्वजनिकस्वास्थ्यसंरक्षणं, शिक्षाप्रसारः, पर्यावरणसंरक्षणं च एतेषां प्रमुखलक्ष्याणि सन्ति।संविधानस्य द्वाविंशतितमसंशोधनद्वारा मौलिककर्तव्यानि सम्मिलितानि सन्ति। राष्ट्रध्वज-राष्ट्रगानयोः सम्मानं, संविधानपालनं, राष्ट्रियैकतासंरक्षणं, वैज्ञानिकदृष्टेः विकासः, पर्यावरणरक्षणं च नागरिककर्तव्येषु गणितानि सन्ति। अधिकारैः सह कर्तव्यपालनं गणतन्त्रस्य सुदृढतायै अनिवार्यम् अस्ति। भारतदेशे संसदीयलोकतन्त्रं प्रचलति। राष्ट्रपति राष्ट्राध्यक्षः अस्ति, सः संवैधानिकप्रमुखः एव। प्रधानमन्त्रिणः नेतृत्वे मन्त्रिपरिषदः वास्तविकशासनसत्ता वहति। लोकसभा जनप्रतिनिधिसभा अस्ति, राज्यसभा संघीयव्यवस्थायाः प्रतिनिधित्वं करोति। कार्यपालिका, विधायिका तथा न्यायपालिका-एतेषां त्रयाणां शक्तीनां पृथक्करणं लोकतन्त्रस्य मूलाधारः अस्ति। विधायिका देशस्य नियमविधीन् निर्माणं करोति, कार्यपालिका तान् विधीन् कार्यरूपेण क्रियान्वितं करोति, न्यायपालिका च तेषां पालनस्य निरीक्षणं कृत्वा न्यायं वितरति। यदि सर्वाः शक्तयः एकस्मिन् एव हस्ते स्युः, तर्हि निरङ्कुशता सम्भवेत्। अतः शक्तिविभाजनं परस्पर-नियन्त्रणं स्थापयति, येन लोकतन्त्रे संतुलनं, पारदर्शिता तथा नागरिकानां अधिकाररक्षा च सुनिश्चिता भवति।

न्यायपालिका संविधानस्य संरक्षिका अस्ति। सर्वोच्चन्यायालयः संविधानस्य अन्तिमव्याख्याता अस्ति। न्यायिकसमीक्षा, जनहितयाचिका, मौलिकाधिकाररक्षणं च न्यायपालिकायाः प्रमुखकार्याणि सन्ति। एतेन भारतीयगणतन्त्रे विधायिका-कार्यपालिकयोः स्वेच्छा नियन्त्रिता भवति।

भारतदेशः 'विविधतायां एकता' इति सूत्रेण विश्वविख्यातः वर्तते। अस्मिन् देशे बहवः धर्माः, भाषाः, जातयः, परम्पराः च सन्ति। गणतन्त्रव्यवस्था सर्वेषां संरक्षणं करोति। भारतीयसंस्कृतिः सहिष्णुता, समन्वयः, वसुधैव कुटुम्बकम् इति भावनया समृद्धा अस्ति। गणतन्त्रदिवसः राष्ट्रगौरवस्य प्रतीकः अस्ति। अस्मिन् दिवसे नवदिल्लीनगरे कर्तव्यपथे 'भव्यपरेड'इतिआयोज्यते। राष्ट्रपतिः तिरङ्गध्वजस्य उत्तोलनं करोति। सैन्यबलानां शौर्यं, राज्यप्रदर्शनी, सांस्कृतिककार्यक्रमाः च राष्ट्रैक्यं प्रदर्शयन्ति। आधुनिककाले भारतगणतन्त्रस्य समक्षे भ्रष्टाचारः, जीविकोपार्जनस्य अभावः, अशिक्षा, निर्धनता, जनसंख्यावृद्धिः, पर्यावरणदूषणं, यान्त्रिकभेदः च इत्यादयः समस्याः सन्ति। एतासां समाधानाय संवैधानिकमूल्यानां पालनं, नागरिकजागरूकता, सुशासनं च अत्यावश्यकम् वर्तते। भारतीयगणतन्त्रं केवलं शासनप्रणाली न, अपि तु जीवनमूल्यव्यवस्था अस्ति। समता, स्वतन्त्रता, न्यायः, बन्धुता च एते अस्य आत्मानः सन्ति। यदा नागरिकाः अधिकारैः सह कर्तव्यपालनं कुर्वन्ति, तदा एव गणतन्त्रं सशक्तं भवति। भारतीयगणतन्त्रस्य संरक्षणं, संवर्धनं च प्रत्येकं नागरिकस्य परमकर्तव्यम् अस्ति। अपि च भारतदेशः भविष्ये अपि लोकतन्त्रस्य, मानवतायाः, विश्वबन्धुत्वस्य च प्रकाशस्तम्भः स्थास्यति एव। वदतु संस्कृतं,जयतु भारतम् । इत्यलम्।